# Narayana Stotram

# નારાયણસ્તોત્રમ્

## Document Information

Text title : Narayana Stotram 3

File name : nArAyaNastotram3.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : Manish Gavkar

Latest update : September 24, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# નારાયણસ્તોત્રમ્

નારાયણો યો નરભૂજલાયો નારાયણોઽજ્ઞાનનિવર્તનેન ।
નારાયણોઽન્તર્યમનેન પુંસાં તમાદિનારાયણદેવમીડે ॥ ૧॥

પુરાણવર્ણાઃ પુરુષોત્તમસ્ય પુરાણમન્ત્રઃ પુરુષઃ પુરાણઃ ।
દધાર યોઽસૌ પરિપૂર્ણરૂપસ્તમાદિનારાયણદેવમીડે ॥ ૨॥

મન્ત્રાત્મકો મન્ત્રગુણૈસ્સ્તુતો યો યસ્સર્વમન્ત્રાન્પ્રદદૌ મુનિભ્યઃ ।
મન્ત્રાધિદેવોઽખિલમન્ત્રગમ્યતસ્માદિનારાયણદેવમીડે ॥ ૩॥

નિશ્વાસભૂતા નિગમાલિરસ્ય પ્રશ્વાસરૂપાગમપઙ્ક્તિરિદ્ધા ।
સમસ્તશાસ્ત્રાણિ ચ યસ્ય વાચસ્તમાદિનારાયણદેવમીડે ॥ ૪॥

યસ્યાષ્ટવર્ણં મનુરાજમેકં સમાશ્રિતસ્સંસૃતિપારમેતિ ।
વિધેર્વિધાનં ન હ્યત્ર કિઞ્ચિત્ તમાદિનારાયણદેવમીડે ॥ ૫॥

યો વાસુદેવઃ ખલુ વામદેવો યો દેવદેવઃ પ્રથમં તતોઽભૂત્ ।
પાર્શ્વદ્વયાદસ્ય ચ વક્ષસશ્ચ તમાદિનારાયણદેવમીડે ॥ ૬॥

શેષાય દેવાય વિશેષભર્ત્રે અશેષમન્ત્રાન્પ્રદદૌ સશેષાન્ ।
નિઃશેષતઃ ક્લેશનિવૃત્તયેઽસૌ તમાદિનારાયણદેવમીડે ॥ ૭॥

ગુરુર્ગુરૂણામૃષભો ઋષીણાં યોં દેવદેવઃ ખલુ દેવતાનામ્ ।
યશ્ચેશ્વરાણાં પરમેશ્વરોઽસૌ તમાદિનારાયણદેવમીડે ॥ ૮॥

ઇતિ નારાયણસ્તોત્રં ભણિતં ત્રિપુરારિણા ।
પઠનાચ્છ્રવણાત્સદ્યો હૃદ્યાં શુદ્ધિં પ્રયચ્છતિ ॥ ૯॥

(૧૧-૧૯)

ઇતિ શ્રીશાણ્ડિલ્યસંહિતાયાં પઞ્ચમે ભક્તિખણ્ડે એકાદશોઽધ્યાયે
નારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Manish Gavkar

*Narayana Stotram*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*